श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला - १६

# भारतीयदर्शनसिद्धान्तप्रभा

प्रधानसम्पादकः

**प्रो. गोपबन्धुमिश्रः**

कुलपतिः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

सम्पादिका

**डॉ. बी. उमामहेश्वरी**

सहायिकाचार्या

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्,

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्- गुजरातम्**

Scanned with CamScanner

प्रकाशकः -

डॉ. दशरथजादवः
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,
राजेन्द्रभुवन रोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातराज्यम्
दूरभाषः - ०२८७६ - २४४५३२, फेक्सः २४४४१७
E-mail: sssu.veraval@gmail.com
Web: www.sssu.ac.in

सहायकसम्पादकः समन्वयकश्च

डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

© *Shree Somnath Sanskrit University, 2020*

| | | |
|---|---|---|
| संस्करणम् | - | प्रथमम् |
| वर्षम् | - | मार्च -२०२० |
| प्रतिकृतयः | - | ३५० |
| **ISBN** | - | 978-93-83097-35-7 |
| मूल्यम् | - | ₹५१०/- |
| मुद्रकः | - | जलाराम ग्राफिक्स एन्ड ऑफसेट<br>परमहंस एपार्टमेन्ट के पास, होटेल कावेरी के पीछे,<br>एस. टी. रोड, वेरावल-३६२ २६६,<br>जि. गीर-सोमनाथ, गुजरात (भारत)<br>दूरभाष - ०२८७६-२२१८६१ |



Scanned with CamScanner

# श्रीमद्भागवतमहापुराणे तृतीयैकादशस्कन्धयोः साङ्ख्यदर्शनम्

डॉ. पङ्कजकुमार एस. रावलः
प्राध्यापकः, पुराणेतिहासः
श्रीसोमनाथसंस्कृतयुनिवर्सिटीसंचालितसंस्कृतकॉलेज,
वेरावलम्।

## प्रस्तावना

भगवतो भगवत्या वेदम् इति भागवतम्। श्री अर्थात् अनपायिन्या राधया लक्ष्म्या वा युतो हरिः श्रीकृष्णः यः सः भागवतः । भगवतः इदं तत् भागवतम्।

**यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः।**
**वृत्रासुरवधोपेतं तद्भागवतमिष्यते।।** (मत्स्यपुराणम्)

**भातीदं सर्वलोकेषु गीयते नारदादिभिः।**
**वरिष्ठं सर्वशास्त्राणां तत्त्वं परमगोपितम्।।**

यत्र भगवतः विवधावताराणां ज्ञानभक्तिकर्मणां विविधधर्माणां विस्तृतं वर्णनं च प्राप्यते तत् पुराणविशेषं तच्छास्त्रविशेषं भागवतम्। विविधानां शास्त्राणां शास्त्रैश्च दर्शितं तत्त्वं यत्र विलसति तादृशं वेदव्यासस्य समाधिभाषाभूतं सर्वस्वं यत् तत् भागवतम्। यत्र द्वादशस्कन्धा सन्ति। पञ्चत्रिंशदधिकत्रिशतमध्यायासन्ति। अष्टादशसहस्रपरिमिताः श्लोकास्सन्ति। तथा च परीक्षिच्छुकसंवादः यत्र विलसति तादृशं मोक्षसाधनभूतं शास्त्रं पुराणविषयं पुराणविशेषं जन्मसाफल्यसाधकं पुराणरत्नं न अपि महापुराणं दशलक्षणैर्युतं श्रीमद्भागवतमहापुराणमाश्रित्य तृतीयैकादशस्कन्धयोः निरूपितं साङ्ख्यदर्शनं ज्ञानं प्रस्तोतुं नम्रः प्रयासः क्रियते।



Scanned with CamScanner

किं नाम साङ्ख्यम्? तर्हि प्रश्ने जाते सततं तस्य द्वौ अर्थौ भवतः । साङ्ख्यम् नाम सङ्ख्याया युतं युक्तं वा यदस्ति तत् तथा च साङ्ख्यं नाम ज्ञानम् यद् ज्ञानं प्रकृतिपुरुषयोः विवेकज्ञानेन युतं विद्यते। कपिलमुनिकृतदर्शनशास्त्रविशेषः। दुःखस्य कारणं यदस्ति तद् दर्शयति इति कृत्वा दर्शनशास्त्रम्। दुःखत्रयाभिघातात् यस्यापरं नाम कपिलः। साङ्ख्यं कपिलमुनिना प्रोक्तं संसारविमुक्तिकारणम्। यत्रैताः सप्ततिरार्या भाष्यं चात्र गौडपादकृतम्। एतत् पवित्रमग्र्यं मुनिनासुरयेऽनुकम्पया प्रददौ। आसुरोऽपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम्। शिष्यपरम्परयागतमीश्वरकृष्णेन चैतदार्याभिः। संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम्। सप्तत्यां किलप्तयेऽर्थास्तेऽर्थाः कृत्स्नस्य षष्ठितन्त्रस्याख्यायिका विरहिताः परवादविवर्जिताश्चापि। (साङ्ख्यप्रवचनभाष्यम्)

- साङ्ख्ययोगः नाम ज्ञानयोगः ब्रह्मविद्यायोगः।
- नास्ति साङ्ख्यसमं ज्ञानम् (महाभारते)
- सङ्ख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते। तत्त्वानि च चतुर्विंशत् तेन साङ्ख्या प्रकीर्तिताः।। (महाभारते)
- चर्चा सङ्ख्या विचारणा। (अमरकोषः)
- दोषाणां च गुणानां च प्रमाणं प्रतिभागतः। कञ्चिदर्थभिप्रेत्य सा साङ्ख्येत्युपधार्यताम् .[१]
- शुद्धात्मतत्त्वं विज्ञानं साङ्ख्यमित्यभिधीयते।
- इमे सत्वरजस्तमांस्ति गुणा मया दृश्या। अहं तेभ्योऽन्यः तद् व्यापार साक्षीभूतो नित्योगुणविलक्षणः आत्मेति चिन्तनमेषः साङ्ख्यः।[२] सङ्ख्या

१ महाभारते शान्तिपर्व - ३१३

२ गीताभाष्यम् - १३-१४



Scanned with CamScanner

सम्यक् विवेकेनात्मकथनमित्यर्थः। (विज्ञानभिक्षुः) सेश्वरवादयुतं दृश्यते= ज्ञायते = विचार्यते अनेन इति दर्शनम्साङ्ख्य-दर्शनम्। साङ्ख्यदर्शनपञ्चविंशतिपदार्थानां सम्यक् ज्ञानेन मुक्तिः योगदर्शने योगक्रियाजन्यं ज्ञानं मोक्षसाधनं भवति। किन्तु वस्तुतः तयोर्मध्ये न कोऽपि भेदः।

- एकं साङ्ख्यदर्शने ज्ञानस्य प्राधान्यं योगदर्शने क्रियाप्राधान्यम्। एकेन मतेन निरीश्वरवादीदर्शनमिदं साङ्ख्यम्।

श्रीमद्भागवतमहापुराणे तृतीयस्कन्धे साङ्ख्यदर्शनम्-

महापुराणेऽस्मिन् तृतीयस्कन्धे साङ्ख्यशास्त्रप्रवर्तकः श्रीकपिलः साक्षादवतरति स्वमात्रे च देवहुतिं साङ्ख्योपदेशं ददाति। येनोपदेशेन माता देवहूतिः परमां गतिं प्राप्नोति तस्य विवर्णनं द्वयोः अध्याययोः कृतं विद्यते।

तत्र षडविंशतितमाध्याये महदादितत्त्वानामुत्पत्तिवर्णनमागच्छति। यत्र श्रीकपिलः प्रायः साङ्ख्यदर्शनं भणति।

सप्तमविंशतितमाध्याये प्रकृतिपुरुषयोः विवेकेन मोक्षप्राप्तिः कथं भवति तद् विवरणं विद्यते। अनेनाध्यायेन अस्माभिः द्वावेव शब्दौ ज्ञेयौ। का प्रकृतिः कश्च सः पुरुषः? तयोर्सम्यक् ज्ञानेन मोक्षपुरुषार्थः सफलो सुफलो भवति।

स्कन्धेऽस्मिन् साङ्ख्यदर्शनप्रकरणे अध्याये वा वक्ता श्रीकपिलः (पुत्ररूपेण) श्रोता श्रीदेवहुतिः (मातृरूपेण)

**श्रीभगवानुवाच (कपिल उवाच)**

**अथ ते सम्प्रवक्ष्यामि तत्त्वानां लक्षणं पृथक्।**
**यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः।।**[३]

---

[३] भा.पु. ३/२६/११

**ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्मदर्शनम्।**
**यदाहुर्वर्णये तत्ते हृदयग्रन्थिभेदनम्।।[४]**

अत्र पूर्वार्धे आदिशब्देन अन्तिमशब्दयोगेन ज्ञानदर्शनम् ना साङ्ख्यदर्शनमिति स्पष्टं भवति। आत्मदर्शनरूपं ज्ञानमेव मोक्षसाधनमि कपिलो वदति।

- ऋते ज्ञानान्मुक्तिः।
- ज्ञानं लब्ध्वा परां शान्तिः।
- सत्त्वात् सञ्जायते ज्ञानं।
- न ही ज्ञानेन सदृशं पवित्रमिह विद्यते।

ज्ञानमपि मोक्षसाधनम्। किन्तु ज्ञानं नाम प्रकृतेः ज्ञानं पुरुषस्य ज्ञानम्।




**यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम्।**
**प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत्।।[५]**

प्रकृतिः त्रिगुणात्मिका अव्यक्ता नित्या कर्मकारणरूपा च विद्यते निर्विशेषा भूत्वा सर्वेषां विशेषधर्माश्रिता भवति। प्रधाननाम्नः यत् तत्वं तस् तत्त्वायैव प्रकृतिः कथ्यते।

---

४ भा.पु. ३/२६/२
५ भा.पु. ३/२६/१०

चतुर्विंशतितत्वानि यानि कानि तानि प्रकृतिः कार्यभूतानि सन्ति। कानि चतुर्विंशतितत्त्वानि च तानि? -तर्हि....

**पञ्चभिः पञ्चभिर्ब्रह्म चतुर्भिदर्शभिस्तथा।**
**एतच्चतुर्विंशतिकं गणं प्रधानिकं विदुः।।[६]**

पञ्चमहाभूतानि
- पृथ्वी
- जलम्
- तेजः
- वायुः
- आकाशः

पञ्चतन्मात्रा
- गन्धः
- रसः
- रूपम्
- स्पर्शः
- शब्दः

अन्तकरणचतुष्टयम्
- मनः
- बुद्धिः
- चित्तम्
- अहङ्कारः

पञ्चज्ञानेन्द्रियाणि
- श्रोत्रम्
- त्वक्
- चक्षुः
- जिह्वा
- घ्राणम्

पञ्चकर्मेन्द्रियाणि
- वाक्
- पाणिः
- पादः
- पायुः
- उपस्थः,

५+५+४+५+५ = २४

- कालः पञ्चविंशतितमं तत्त्वम्। केचन प्राहु एनं पुरुषः तथा च स एव ईश्वरस्य संहारात्मिका शक्तिः भगवान् एव कालः

[६] भा.पु. ३/२६/११



Scanned with CamScanner

**अन्तः पुरुषरूपेण कालरूपेण यो बहिः।**
**समन्वेत्येष सत्त्वानां भगवानात्ममायया।।७**

यदा परमात्मना मायायां चित्तशक्तिरूपं शुक्रं स्थापितं तदा तस्मा तेजोमयं महत्तत्वं समुत्पन्नम्। महत्तत्वसमुत्पन्नेना-न्धकारः नष्टः।

परमात्मा + माया + = महत्तत्वम् (चित्तम्)

| अन्तःकरणम् | अधिष्ठाता | उपास्यदेवः |
| --- | --- | --- |
| मनः | चन्द्रमाः | अनिरुद्धः |
| बुद्धिः | ब्रह्मा | प्रद्युम्नः |
| चित्तम् (अधिभूते महत्तत्वम्) | क्षेत्रज्ञः | वासुदेवः |
| अहङ्कारः | रुद्रः | सङ्कर्षणः |

महत्तत्वस्य विकृतत्वात् तस्मात् क्रियाशक्तित-प्रधानोऽहङ्कारः।

**क्रियाशक्तिप्रधानोऽहङ्कारः**

वैकारिकः — तेजसः — तामसः

मनः — इन्द्रियाणि(५+५) — पञ्चमहाभूतानि

**अहङ्कारस्य लक्षणम्**

देवतारूपेण — इन्द्रियरूपेण — पञ्चमहाभूतरूपेण

कर्तृत्वम् — करणत्वम् — कार्यत्वम्

---

७ भा.पु.३/२६/१८

८ भा.पु.३/२६/२१



Scanned with CamScanner

**गुणदृष्ट्या लक्षणम्**

- शान्तत्वम्
- घोरत्वम्
- मूढत्वम्

**वैकारिकाहङ्कारविकृतत्त्वात्**

मनः

- सङ्कल्पः
- विकल्पः

**तैजसाहङ्कारविकृतत्त्वात्**

बुद्धिः

- वस्तुस्फुरण विज्ञानम्
- इन्द्रियाणां व्यापारे सहायकः
- पदार्थानां विशेषं ज्ञानम्

**बुद्ध्याः लक्षणम्**

- संशयः
- विपरीतं ज्ञानम्
- निश्चयः
- स्मृतिः
- निद्रा

तामसाहङ्कारविकृतत्त्वात् शब्दः शब्दात् आकाशः ताभ्याम् (शब्दाकाशाभ्याम्) श्रोत्रम्

आकाशविकृतत्वात् स्पर्शतन्मात्रा तस्मात् वायुः त्वक् च।

वायोः विकृतत्वात् रूपम् तस्मात् तैजः रूपं च नेत्रम्।

तेजसः विकारात् रसः तस्मात् जलं रसना च।

रसविकृततत्त्वात् गन्धम् तस्मात् पृथ्वी घ्राणं च।

Scanned with CamScanner

| पञ्चमहाभूतानि | गुणः | विषयः |
|---|---|---|
| आकाशम् | शब्दः | श्रोत्रेन्द्रियम् |
| वायुः | स्पर्शः | त्वगिन्द्रियम् |
| तेजः | रूपम् | नेत्रेन्द्रियम् |
| जलम् | रसः | रसनेन्द्रियम् |
| पृथ्वी | गन्धम् | घ्राणेन्द्रियम् |

समस्तमहाभूतानां सर्वे गुणाः केवलं भूमौ एव दरीदृश्यन्ते प्रतीयते।

- श्रीमद्भागवतसहापुराणे एकादशस्कन्धे साङ्ख्यदर्शनम्

अस्मिन् स्कन्धे द्वाविंशतितमेऽध्याये साङ्ख्यदर्शनस्य विषयः साक्षात् भगवता श्रीकृष्णेनोपस्थाप्यते। अत्र वक्ता स्वयं भगवान् श्रीकृष्णः वर्तते। अत्र श्रोता भगवत्प्रियोद्धवः विद्यते।

तत्त्वस्य सङ्ख्याविषये आदौ उद्धवेन प्रश्नाः क्रियन्ते। अस्मिन्नेव स्कन्धे एकोनविंशतितऽमेध्याये नवएकादश-पञ्च एवं त्रीणि एवं आहत्य अष्टविंशति तत्त्वानि भवता उपस्थापितानि किन्तु केचन षड्विंशति केचन पञ्चविंशति केचन सप्त नव वा इत्थं तत्वसङ्ख्यायां भेदं प्रदर्शयन्ति। केचन पुनः चत्वारि तत्वानि कथयन्ति पुनश्च केचन एकादशतत्त्वानि च कथयन्ति। केचन ऋषयः सप्तदशतत्त्वानि परिगणयन्ति केचन षोडश केचन त्रयोदश। इत्थं अनेकाभिः तत्वसङ्ख्याभिः किमपि स्पष्टं न भवति अतः कृपया स्पष्टं कुर्वन्तु कथयन्तु च।

भगवता एकेन वाक्येन तदपि कथ्यते यत् सर्वाण्यपि उत्तराणि योग्यानि सन्ति।

**पौर्वापर्यमतोऽमीषां प्रसङ्ख्यानमभीप्सताम्।**
**यथा विविक्तं यद्वक्तं गृह्णीमो युक्तिसम्भवात्।।**[१]

---

१ भा.पु. ११/२२/९

| तत्वसङ्ख्या | कथमिति उत्तरम् |
|---|---|
| -२६ | २४-तत्त्वानि |
| | ०१ - पुरुषः |
| | ०१ - ईश्वरः |
| -२५ | २४ - जडतत्त्वानि |
| | ०१ - चेतनः |
| -२८ | ०९ = पुरुषः प्रकृति महत्त्वम् अहङ्कारः आकाशः वायुः तेजः जलम् पृथ्वी । |
| | ०५ = श्रोत्रम् त्वक् चक्षुनासिकारचना |
| | ०५ = वाक् पाणि पाद पायु उपस्थ |
| | ०१ - मनः |
| | ०५ - रूप-रस-गन्ध शब्द स्पर्श |
| | ०३ - सत्व-रज-तमः |
| ०७ | ०५ - महाभूतानि |
| | ०१ - जीवः |
| | ०१ - परमात्मा |
| ०६ | ०५ – महाभूतानि |
| | ०१ – परमपुरुषः |
| ०४ | ०४ - आत्मा-तेज-जलम्-पृथ्वी |
| १७ | ०५ - महाभूतानि |
| | ०५ - तन्मात्रा |
| | ०५ - ज्ञानेन्द्रियाणि |
| | ०१ - मनो ०१-आत्मा |



Scanned with CamScanner

१६
०५ –महाभूतानि
०५-तन्मात्रा
०५ - ज्ञानेन्द्रियाणि
०१ - आत्मा

१३
०५ - महाभूतानि
०५ - ज्ञानेन्द्रियाणि
०१ - मनः
०१ - जीवात्मा
०१ - परमात्मा

११
०५ - महाभूतानि
०५ - ज्ञानेन्द्रियाणि
०१ - आत्मा

०९
०५ - महाभूतानि
०३ - मनः बुद्धिः अहङ्कारः
०१ - पुरुषः

**इति नाना प्रसङ्ख्यानं तत्त्वानामृषिभिः कृतम्।**
**सर्वं न्याय्यं मुक्तिमत्त्वाद् विदुषां किमशोभनम्।**[१०]
**पञ्चविंशति तत्वज्ञोयत्रतत्राश्रमे वसन्।**
**जटी मुण्डी शिखी वापिमुच्यते नात्र शंसयः।।**

---

[१०] भा.पु. ११/२२/२५

# सन्दर्भग्रन्थाः


१. साङ्ख्यकारिका

२. साङ्ख्यतत्त्वकौमुदी

३. महाभारतम्

४. श्रीमद्भागवतमहापुराणम्

५. श्रीमद्भगवद्गीता

६. देवीभागवतम्

७. गीताभाष्यम्

८. अमरकोषः

९. विज्ञानभिक्षुः

१०. साङ्ख्यप्रवचनभाष्यम्

११. शब्दकल्पद्रुमः

१२. पद्मपुराणम्


।। इति शम् ।।



Scanned with CamScanner